# संस्कृत-वार्ताः

**दिनाङ्क :- 14.05.2025** **सायम् :- 06:20**

**आदौ-मुख्यवार्ता**

- **अरुणाचलप्रदेशराज्यस्य अन्तः स्थलेभ्यः नूतनानि नामानि निर्दिष्टुं चीनदेशस्य निरन्तरम्, निराधारम्, असंगतञ्च प्रयत्नम् भारतदेशः स्पष्टतया निराकृतवान्।**
- **सैन्यत्रयप्रमुखैः अद्य राष्ट्रपतिना द्रौपदी मुर्मु इत्यनया सह मिलित्वा आपरेशन् सिन्दूर् इति विषयः ज्ञापितः।**
- **भारतस्य आपरेशन् सिन्दूर् इत्यभियानम् रक्षाक्षेत्रीयैः अन्ताराष्ट्रिय-विशेषज्ञैः निर्णायक-सैन्य-विजयत्वेन प्रशंसितमस्ति।**
- **उत्तरप्रदेशस्य जेवरविमानस्थानं निकषा एकस्य सेमीकंडक्टर इति अर्धचालकेत्यस्य उद्योगस्य संस्थापनाय अनुमोदनं सर्वकारेण कृतम् अस्ति।**
- **न्यायाधीशः भूषण रामकृष्ण गवयिः भारतस्य सर्वोच्चन्यायालयस्य द्विपञ्चाशत्तम-मुख्यन्यायाधीशत्वेन अद्य प्रातः राष्ट्रपतिभवने समायोजिते विशेषसमारोहे शपथवचनं स्वीकृतवान्।**

---------------------------------------------

**विदेशमन्त्रालयः/ चीन/ अरुणाचलः**

**अरुणाचलप्रदेशराज्यस्य अन्तः स्थलेभ्यः नूतनानि नामानि निर्दिष्टुं चीनदेशस्य निरन्तरम्, निराधारम्, असंगतञ्च प्रयत्नम् भारतदेशः स्पष्टतया निराकृतवान्। प्रसारमाध्यमेषु समागतप्रश्नानामुपरि प्रतिक्रियारूपेण, विदेशमन्त्रालयस्य प्रवक्ता रणधीर् जैस्वाल् इत्येषः पुनः उक्तवान् यत् एतादृशाः क्रियाः पूर्णतया अस्वीकार्याः सन्ति, तथा च भारतीय सुसंगतसिद्धान्तानुगुणञ्च साक्षात् विरुद्धमस्तीति। अरुणाचलप्रदेशः भारतस्य अभिन्नः अविभाज्यश्च भागः आसीत्, अस्ति, सर्वदा च भविष्यतीति स्पष्टं निर्विवादञ्चास्ति, यथार्थं परिवर्तयितुं तस्य पुनः नामकरणं न शक्यते इति सः सबलं प्रतिपादितवान्।**

---------------------------------------------

**सिन्दूराभियानेन सूचिता राष्ट्रपतिः**

**सैन्यत्रयप्रमुखः, जनरल अनिल चौहानः,सेनाध्यक्षः, जनरल् उपेन्द्र द्विवेदी, वायुसेनाप्रमुखः, ए. पी. सिङ्घः नौसेनाध्यक्षश्च एड्मिरल् दिनेश के. त्रिपाठी च अद्य राष्ट्रपतिना द्रौपदी मुर्मू इत्यनया सह मिलित्वा आपरेशन् सिन्दूर् इति**

विषयं ज्ञापितवन्तः। एकस्मिन् सामाजिक-जालपुटप्रकाशने राष्ट्रपतिः सशस्त्र-बलानां साहसस्य समर्पणस्य च प्रशंसाम् अकरोत्, आतंकवादं विरुध्य भारतस्य प्रतिक्रिया उल्लेखनीयास्तीति च साउक्तवती ।

---------------------------------------------

अन्ताराष्ट्रियस्तरे सिन्दूराभियानम्:

भारतस्य आपरेशन् सिन्दूर् इत्यभियानम् रक्षाक्षेत्रीयैः अन्ताराष्ट्रिय-विशेषज्ञैः निर्णायक-सैन्य-विजयत्वेन प्रशंसितमस्ति, यस्मिन् प्रमुखः अमेरिकीय-सैन्य-वयोवृद्धः, जॉन् स्पेन्सरः अपि अस्ति। एप्रिल्मासस्य द्वाविंशे दिनाङ्के पहलगाम्- इति क्षेत्रे कृत-क्रूराक्रमणस्य उल्लेखं कुर्वन् स्पेन्सरः अभियानमिमं द्रुतं सुनिर्दिष्टञ्चेति उक्तवान् । सः परमाणोः मृथाभयं विरुध्य प्रधानमन्त्रिणः नरेन्द्रमोदिनः दृढां स्थितिं प्राशंसयत्, यत्र उक्तमासीत् यत् भारतदेशः आपदाम् न सहति तथा च सुनिर्दिष्टतया दृढनिश्चयेन च प्रतिक्रियां करोतीति सन्देशमपि सः अधोरेखितवान्। सः अवदत् यत् "भारतदेशः प्रतिकारार्थं युद्धं न कुर्वदासीत्" इति। सः प्रतिरोधाय युद्धं कुर्वन् आसीत्। सः एतदपि अवदत् यत् भारतस्य संयमः दुर्बलता न, अपितु परिपक्वता अस्तीति। आस्ट्रिया-देशस्य विमानयानविश्लेषकः लेखकः च टाम् कूपर् इत्येषः अपि भारतस्य प्रतिक्रियां "क्लियर्कट्विक्ट्रीति" इत्युक्ते स्पष्टविजयमिति वर्णितवान्। एकस्मिन् सामाजिक-जालपुटे श्रीकूपर् इत्ययम् अवोचत् यत् पाकिस्तानस्य युद्धविरामं प्रति अग्रे गमनस्य निर्णयः भारतस्य श्रेष्ठ-सैन्य-प्रतिक्रियायाः प्रत्यक्षः परिणामः आसीदिति।

---------------------------------------------

मन्त्रिमण्डलस्य विवरणम् :

उत्तरप्रदेशस्य जेवरविमानस्थानं निकषा एकस्य सेमीकंडक्टर इति अर्धचालकेत्यस्य उद्योगस्य संस्थापनाय अनुमोदनं केन्द्र-सर्वकारेण कृतम् अस्ति । अद्य नवदिल्ल्यां सामाजिकान्तर्जालीय-पटले सूचनाप्रसारणमन्त्री अश्विनीवैष्णवः अवदत् यत् अस्य एकस्य प्रवर्गस्य संस्थापनं एचसीएल-फॉक्सकॉन्- इत्येतयोः संयुक्तोद्यमेन सह इण्डिया सेमीकण्डक्टर् मिशनेत्यस्यान्तर्गतं भवति । सः अवदत् यत्, अस्य संयन्त्रस्य निर्माणं प्रतिमासं विंशति-सहस्रं यावत् वेफर्स् इत्यस्योत्पादनाय अस्ति, निर्माणोत्पादनक्षमता च प्रतिमासं षड्त्रिंशत् मिलियन यूनिट् इति अस्ति। सः अवदत् यत् जेवर इत्यत्र नूतनं अर्धचालक-सन्यन्त्रं सप्तशताधिक-त्रिसहस्र-कोटिरूप्यकाणां निवेशं आकर्षयिष्यति।

श्रीवैष्णवः अवदत् यत्, पञ्च अर्धचालक-सन्यन्त्राणि पूर्वमेव निर्माणस्य उन्नते स्तरे सन्ति तथा च एतैः षट्-सन्यन्त्रैः सह भारतं सामरिकदृष्ट्या महत्त्वपूर्णस्य अर्धचालक-उद्योगस्य विकासाय स्वयात्रायां अग्रे गच्छति। सः अवदत् यत्, सप्तत्यधिक- द्विशत-शैक्षणिकसंस्थासु सप्तति नवोद्योगेषु च छात्राः उद्यमिनः च नूतनानां उत्पादानाम् विकासाय विश्वस्तरीय नवीनतम-विनिर्माण-प्रौद्योगिकीषु कार्यं कुर्वन्ति।

---------------------------------------------

सी.जे.आई. गवायि/शपथवचनम्

न्यायाधीशः भूषण रामकृष्ण गवयिः भारतस्य सर्वोच्चन्यायालयस्य द्विपञ्चाशत्तम-मुख्यन्यायाधीशत्वेन अद्य प्रातः राष्ट्रपतिभवने समायोजिते विशेषसमारोहे शपथवचनं स्वीकृतवान्, राष्ट्रपतिना द्रौपदी मुर्मू वर्यया च शपथवचनं ग्राहितम्। न्यायाधीशः बी. आर्. गवयिः पूर्वमुख्य न्यायाधिशस्य सञ्जीव् खन्ना इत्यस्य उत्तराधिकारी अभवत्, येन ह्यः मुख्यन्यायाधीश कार्यालयः त्यक्तः। समारोहेस्मिन् उपराष्ट्रपतिः जगदीपधनखड, प्रधानमन्त्री नरेन्द्रमोदी, केन्द्रस्य अनेके मन्त्रिणः, सर्वोच्चन्यायालयस्य न्यायाधीशाः च भागम् अगृह्णन्।

---------------------------------------------

पञ्जाब/ बी.एस्.एफ्. सैनिकस्य पुनरागमनम्

सीमा-सुरक्षा-बलस्य एकः सैनिकः पूर्णम् कुमार् शॉ, पञ्जाब्-राज्यस्य फ़िरोज़पुर्-क्षेत्रे अनवधानेन अन्ताराष्ट्रियसीमा-पारं कृत्वा एप्रिल् मासस्य त्रयोविंशतितमे दिनाङ्के पाकिस्तानी-रेन्जर्स्-द्वारा निगडितः आसीत्, सः अद्य प्रातः भारतं प्रत्यागतवान्।

---------------------------------------------

संघलोकसेवायोगाध्यक्षः

राष्ट्रपतिपदासीनया द्रौपदी मुर्मू इत्यनया डॉ.अजय कुमारं सङ्घलोक सेवायोगस्य अध्यक्षः नियोजितः। कार्मिकप्रशिक्षणविभागात् निर्गतादेशानुसारं डॉ. कुमारस्य कार्यकालः तस्मिन्नेव दिने आरप्स्यते यस्मिन् दिने सः आयोगाध्यक्षरूपेण प्रभारं स्वीकरिष्यति। डॉ. कुमारः पञ्चाशीत्यधिकैकोनविंशतितमवर्ष- वर्गस्य केरलसंवर्गस्य सेवानिवृत्तः भारतीयप्रशासनिकसेवापदाधिकारी अस्ति । सः पूर्वं ऊनविंशत्यधिक द्विसहस्रतम वर्षस्य अगस्तमासात् द्वाविंशत्यधिक द्विसहस्रतम वर्षस्य अक्टोबर्-मासपर्यन्तं रक्षासचिवरूपेणापि कार्यं कृतवान् ।

---------------------------------------------

पाकदूतावासे अधिककर्मचारी

भारतसर्वकारेण नवदेहल्ल्यां पाकिस्तानदेशीयः एकः अतिरिक्तः कर्मचारी पाकदूतावासे अस्तीति घोषितः। अनुमन्यते यत्  सः व्यक्तिगतरूपेण आधिकारिक-स्थित्यानुपयुक्तेषु कार्येषु भागं ग्रहीतुं अस्तीति। विदेश-कार्यमन्त्रालयः एकस्मिन् वक्तव्ये अवदत् यत् सः पाकिस्तानी-जनः चतुर्विंशतिहोराभ्यन्तरे एव भारतात् बहिः गच्छेदिति।

।। इति वार्ता: ।।